National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2015; 1(2): 13-15
© 2015 NJHSR
www.sanskritarticle.com
Received: 27-10-2015
Accepted: 29-10-2015

**जोगिन्द्रकुमार**
शोधच्छात्रः (शिक्षाशास्त्रविभागः)
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत
विद्यापीठम्
नवदेहली-110016

**Correspondence:**
**जोगिन्द्रकुमार**
शोधच्छात्रः (शिक्षाशास्त्रविभागः)
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत
विद्यापीठम्
नवदेहली-110016

# भारतीयदर्शनेषु जैनदर्शनस्य परिचयः

**जोगिन्द्रकुमार**

भारतीयदर्शनानां प्रयोजनन्तु समस्तेभ्यः सांसारिकदुःखेभ्यः निवृत्तिरेव मुक्तिः अथवा मोक्षप्राप्तिरेव दर्शनानामुद्देश्यमस्ति अस्मिन् संसारे सवऽपि प्राणिनः आध्यात्मिक-आधिभौतिक- आधिदैविकेति त्रिविधः तापैः सन्ति पीडिताः। अतः एतेभ्यः दुःखेभ्यः निवृत्तेः उपायं निर्दिशति दर्शनम्। दर्शनम् दुःखस्य दुःखकारणस्य च, मोक्षस्य मोक्षकारणस्य च प्रतिपादनं करोति। चिकित्साशास्त्रे यथा रोगः, रोगनिदानं, आरोग्यमेवमौषधम् - एतेषां चतुर्णां प्रतिपादनं प्राप्यते तथैव दर्शनमपि दुःखं, दुःखकारणं, मोक्षः, मोक्षकारणस्य च प्रतिपादनं करोति।

1 दर्शनशब्दस्य लभ्यार्थोऽस्ति - ‘ दृश्’ धतोः करणे ‘ ल्युट्’ प्रत्यये सति शब्दाऽयं निष्पद्यते। अस्यार्थोऽस्ति येन माध्यमेन दृश्यते। अर्थात् जीवनविषयकं ज्ञानं प्राप्यते।

2 पश्यति दृश्यतऽनेन दृष्टिमात्रं वा दर्शनम्’ ।

3 दृश्यतऽनेन इति दर्शनम्’ । येन माध्यमेन द्रष्टुं शक्यते अवलोकनं कर्तुं शक्यते तत् दर्शनमिति

4 पश्यति वा येन तद् दर्शनम्’ ।

5 दर्शनं शासनं सामान्यावबोधलक्षणम्’ ।

6 एवम्भूतनयवक्तव्यवशात् दर्शनपर्यायपरिणत आत्मैव दर्शनम्’ ।

एवम्भूतनयस्य अपेक्षा दर्शनपर्यायपरिणत आत्मा एव दर्शनमस्ति। एतासां व्युत्पत्तीनामाधारेण सामान्यतः दर्शनस्यार्थः अयमेव उचितः प्रतीयते येन माध्यमेन दृश्यते तदेव दर्शनम्। अत्रा प्रश्नाऽयमुद्भवति यत् कः पदार्थः दृश्यते? अस्योत्तरमस्ति यत् वस्तुनः सत्यभूतं तात्विकं स्वरूपम्। काऽहं कुतः समायातः अस्य दृश्यमानस्य जगतः सत् स्वरूपं किम्? अस्योत्पत्तिः कुतः अभवत्, अस्य स्रष्टा कः? कारणं किमिदं चेतनमस्ति वा अचेतनमिति, अस्मिन् संसारे अस्माकं कृते किं करणीयं किञ्चाकरणीयं सुन्दररीत्या जीवनसञ्चालनाय किं साधनमित्यादीनां प्रश्नानां समुचितमुत्तरप्रदानमेव दर्शनस्य प्रधानं लक्ष्यमस्ति। भारतीयदर्शनस्य मूलमन्त्रमेव ‘ आत्मानं विद्धि इति अथवा आत्मानं जानीहि इति। वस्तुतः सम्पूर्णभारतीयदर्शनमात्मनः सत्तायामेव प्रतिष्ठितम्।

**दर्शनस्य भेदाः।**

प्रथमतः दर्शनं भागद्वये विभाजयितुं शक्यते –

1. भारतीयदर्शनम् (पूर्वीदर्शनम्)
2. अभारतीयदर्शनम् (पाश्चात्यदर्शनम्)

येषां दर्शनानां प्रादुर्भावः भारतवषऽभवत् तानि भारतीयदर्शनानि येषाञ्च पाश्चात्येषु देशेषु प्रादुर्भावः अभवत् तानि अभारतीयदर्शनानि अथवा पाश्चात्यदर्शनानि कथ्यन्ते। भारतीयदर्शनमपि भागद्वये विभक्तव्यमस्ति-

1. वैदिकदर्शनम्
2. अवैदिकदर्शनम्

वैदिकपरम्परानुसारं वैदिकपरम्परायाः वा येषां प्रादुर्भावः पुनश्च वेदं प्रमाणरूपेण स्वीकुर्वन्ति तानि वैदिकदर्शनानि सन्ति। वैदिकपरम्परायाः भिन्नानि यानि दर्शनानि सन्ति तानि अवैदिकदर्शनानि इति परिगण्यन्ते। वैदिकदर्शनं षट्सु भागेषु विभज्यते सांख्ययोगमीमांसा- वेदान्तन्यायवैशेषिकेषु। अत्र सर्वेषां वैदिकावैदिकदर्शनानां परिचयः संक्षेपेण लिख्यते

**सांख्ययोगदर्शनम्**

वैदिकदर्शनेषु सांख्यदर्शनस्यापि महत्त्वपूर्णं स्थानमस्ति। सांख्यदर्शनं प्राचीनतमं मन्यते। तदनन्तरमेव अन्येषां दर्शनानां विकासोऽभवत्। सांख्यदर्शनस्य दर्शनस्य प्रवत्तकः कपिलमनिः मन्यते। अस्य दर्शनस्य

तिपाद्यविषयोऽस्ति प्रमाणद्वारा महदादिचतुर्विंशतितत्त्वानां सिद्धिः। एतेषामेव चतुर्विंशतितत् संख्याकारणादेव दर्शनमिति सांख्यदर्शनमाख्यायते। सांख्यशब्दस्य अपराऽर्थः विद्यते विवेकज्ञानम्। तदनुसारं प्रकृतिपुरुषयोः विवेकज्ञानमेव मोक्षप्राप्तिर्भवति इति। सांख्यदर्शने प्रत्यक्षानुमानागमः एतानि त्रीणि प्रमाणानि स्वीक्रियन्ते। प्राचीनसांख्याचार्यः ईश्वरस्य सत्तां न स्वीकरोति। कालान्तरे अन्यैः आचार्यैः अस्य सत्ता स्वीकृता। अतः सांख्यदर्शनं सेश्वर-निरीश्वरभेदेन द्विध वर्तते।

**न्यायवैशेषिकदर्शनम्**

विभिन्नैः प्रमाणैरर्थपरीक्षणमेव न्यायः वर्तते। अस्य अपरनाम ' वादविद्या' वर्तते एवञ्च त्रयी वार्ता-दण्ड-आन्वीक्षिकी इति चतसृषु विद्यासु इयमान्वीक्षिकी विद्या वर्तते। न्यायसूत्रस्य रचयिता ' गौतम-ऋषिः' वर्तते। अस्यैवाचार्यस्य अपरनाम अक्षपादः वर्तते। प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास' छल-जाति-निग्रहस्थानानि एते षोडशपदार्थाः न्यायदर्शने स्वीकृताः सन्ति। वैशेषिकदर्शने द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः एते सप्तपदार्थाः स्वीक्रियन्ते। प्रमाणन्तु द्विधैव प्रत्यक्षमनुमानञ्च।

**मीमांसादर्शनम्**

मीमांसादर्शनस्य प्रवर्त्तकः महर्षिः जैमिनिः वर्तते। वस्तुतः यथार्थस्वरूपस्य विवेचनमेव मीमांसा कथ्यते। मीमांसाशब्दस्याथाऽस्ति पूजितविचारः। मीमांसायाः भेदद्वयमस्ति - कर्ममीमांसा, ज्ञानमीमांसा चायमस्य विधिनामनुष्ठानादीनां च वर्णनं कर्ममीमांसा करोति। कर्ममीमांसा एव पूर्वमीमांसा कथ्यते। ज्ञानमीमांसा उत्तरमीमांसा अस्ति। कुमारिलभट्टप्रभाकरभट्टश्च अस्य दर्शनस्य प्रसिद्धाचार्यौ स्तः

**वेदान्तदर्शनम्**

ज्ञानमीमांसा उपनिषद्सिद्धान्तेषु आश्रिता अस्ति। अत एव वेदान्त इति कथ्यते। यतः उपनिषदा रचना वेदानामनन्तरमभवत्। अतः वेदान्तः इति उच्यते।

वेदान्तसूत्रस्य रचयिता महर्षिबादरायणः वर्तते। आचार्यशंकरः, रामानुजः, मधवाचार्यः, प्रसिद्धभाष्यकाराः सन्ति। अवैदिकदर्शनं भागत्रये विभज्यते - जैन-बौद्ध-चार्वाकदर्शनानि।

**चार्वाकदर्शनम्**

अस्य दर्शनस्य प्राचीनतमं नाम ' लोकायतिकम्' अस्ति। बृहस्पतिनामक आचार्यः चार्वाकदर्शनस्य प्रवर्तकः वर्तते। अतः ' बार्हस्पत्यदर्शनम्' इति अस्यापर नाम वर्तते। बृहस्पतिना चार्वाकदर्शनोपरि सूत्रग्रन्थः रचितः आसीत्। यस्योल्लेख विभिन्नेषु स्थानेषु वर्तते। परं वर्तमानसमये सः ग्रन्थः न उपलभ्यते। चार्वाकस्यानुयायिनः मृत्युरेव मुक्तिः इति स्वीकुर्वन्ति। परलोके न विश्वसन्ति। तेषामनुसारं पृथ्वी-जल-अग्नि-वायु एतेषां चतुर्णां भूतानां सङ्‌्घादेव आत्मा वर्तते। ते केवलं प्रत्यक्षमेव प्रमाणं स्वीकुर्वन्ति। चार्वाकस्य प्रमुखसिद्धान्ताऽस्ति – देहात्मवाद

**बौद्धदर्शनम्**

बौद्धदर्शनस्य आरम्भः महात्मागौतमबद्धद्वारा अभवत् यद्यपि गौतमबुद्धेन विशेषरूपेण धर्मस्यैव उपदेश प्रदत्तः आसीत् दर्शनस्य न तथापि बुद्धानन्तरं बौद्धदार्शनिकैः बद्धवचनानामाधारेण ततः दार्शनिकतत्त्वमन्विष्टम्। बौद्धदर्शनस्य प्रमुखः सिद्धान्ताः सन्ति - अनात्मवादः, प्रतीत्यसमुत्पादः, क्षणभङ्गुरवादः, विज्ञानवादः, शून्यवादः, अपोहवादः, बौद्धदर्शने चत्वारो प्रमुखाः सम्प्रदायाः सन्ति। तेषां स्वस्वमतानुसारं विशिष्टा सिद्धान्ताः सन्ति-

1. वैभाषिकम् - बाह्यार्थप्रत्यक्षवादः
2. सौत्रान्तिकम् - बाह्यार्थानुमेयवादः
3. योगाचारः - विज्ञानवादः
4. माध्यमिकः - शून्यवादः

बाद्धदर्शने प्रत्यक्षमनुमानञ्च प्रमाणद्वयं स्वीकृतमस्ति। सर्वेषु भारतीयदर्शनेषु दर्शनद्वय त्यक्त्वा प्रायः सर्वेषां दर्शनानां साहित्यं विशालमस्ति। जैनदर्शनस्य साहित्यमपि अत्यन्तं विशालमस्ति। जैनदर्शनस्य साहित्यं भागद्वये विभाजयितुं शक्यते।

1. दिगम्बरपरम्परायाः साहित्यम्
2. श्वेताम्बरपरम्परायाः साहित्यम्

दिगम्बराः श्वेताम्बराश्च उभयोः परस्परं यो मतभेदाऽस्ति स न तु दार्शनिमतभेदोऽस्ति अपितु आगमिकाऽस्ति। अत एव अनयोः द्वयोः भागयोः साहित्यसमृद्धौ किमप्यन्तरं नैवागतमस्ति।

**जैनदर्शनम्**

येन प्रकारेण विभिन्नानां प्रवर्तकाः ऋषयः महर्षयश्चाभवन्, तेन प्रकारेण जैनदर्शनस्य प्रवर्तकः काऽपि व्यक्तिविशेषः नास्ति। जैनशब्द ' जिन्' शब्दात् निर्मिताऽस्ति जिन शब्दस्यार्थः वर्तते यः जनः ज्ञानावरणादि द्रव्यकर्माणि रागद्वेषादिभावकर्माणि च जयति सः जिन उच्यते। उक्तञ्च - ष्जयति कर्मारातीनिति जिनःष्।एतादृशः जिनद्वारा उपदिष्टधर्मः तथा च दर्शनञ्च जैन्धर्मदर्शनमिति कथ्यते। प्रत्येकऽस्मिन् युगे चतुर्विंशतितीर्थंकराः भवन्ति तथा ते अनादिकालात् प्रचलत् धर्मदर्शनं प्रतिपादयन्ति। वर्तमानयुगे ऋषभदेवादारभ्य महावीरपर्यन्तं चतुर्विंशतितीर्थंकरैः जैनध्मदर्शनयोः सि;द्धान्तः प्रतिपादयन्ति।

आचार्योमास्वामी रचितम् ' तत्वार्थसूत्रम्' जैनदर्शनस्याद्यसंस्कृतभाषायां निबद्ध सूत्राग्रन्थोऽस्ति। जैनदर्शने जीवाजीव-आस्रव-बन्ध-संवर-निर्जर-मोक्षाश्च एतानि सप्ततत्त्वानि सन्ति वर्णितानि। जीव-पुद्गल, धर्म, अधर्म, आकाश, कालश्च एतानि षड्द्रव्याणि स्वीकृतानि सन्ति। ज्ञानावरणदर्शनावरणवेदनीय-मोहनीय-आयु-गोत्र-अन्तरायाश्च एतानि अष्टकर्माणि सन्ति। जीवस्य औदायिक-औपशमिक-क्षायोपशमिक-क्षायिक-पारिणामिकाश्च एते पञ्चाभावाः सन्ति। अरिहन्त-सिद्ध-आचार्य-उपाध्याय-साधुः एते पञ्चपरमेष्ठिनः भवन्ति। अहिंसा-सत्य-ब्रह्मचर्य- अपरिग्रहाश्च एतानि पञ्चव्रतानि सन्ति। जैनदर्शने प्रत्यक्ष-परोक्षञ्च प्रमाणे मन्येते। जैनदर्शने प्रत्येकात्मा कर्मणां नाशं कृत्वा परमात्मा अथवा ईश्वरो भवितुं शक्यते इति उच्यते च ' अप्पा सो परमाप्पा' अथवा ' आत्मा एव परमात्मा' वर्तते इति। जैनदर्शने ईश्वरं सृष्टिकर्तृरूपेण नैव स्वीक्रियते सः न कदापि अवतारं स्वीकरोति न वा प्रत्यावत्र्य आगच्छति। यः आत्मा ज्ञानावरण, दर्शनावरण मोहनीय, अन्तरायाः एतेषां चतुर्णां धतिकर्माणां नाशं करोति सः केवली अथवा अरिहन्तः कथ्यते। ज्ञानावरणाद्यष्टकर्मणां सर्वथा क्षये सति मोक्षप्राप्तिर्भवति। सम्यग्दर्शनं, सम्यग्ज्ञानं, सम्यग्चारित्रमिति त्रयाणां मेलनं मोक्षमार्गोऽस्ति। आचार्येण उमास्वामिना तत्त्वार्थसूत्रे सर्वप्रथमं मोक्षमार्गस्यैव उल्लेखः कृतोऽस्ति - ' सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग' (तत्त्वार्थसूत्राम्) जैनदर्शनानुसारं प्रत्येकवस्तु अनेकधर्मात्मकं वर्तते एवं कापि दृष्टिः तेषामनेकधर्माणां प्रतिपादनं नैव कर्तुं शक्यते इमं सिद्धान्तं अनेकान्तस्याद्वादनाम्ना जैनदर्शनं स्वीकरोति। जैनदर्शनस्योद्देश्यं स्याद्वादसिद्धान्तस्य आधारेण विभिन्नमतानां समन्वयोऽस्ति। विचारजगतः अनेकान्तसिद्धान्त एव नैतिकजगति अहिंसायाः रूपं धरति। अतः भारतीयपाश्चात्यानां दर्शनानामितिहासं ज्ञातुं स्मर्तुं वा जैनदर्शनस्य विशेषतो महत्त्वमस्ति। मुख्यरूपेण भागद्वये विभक्तास्ति। श्रमणविचारधारा, ब्राह्मणविचारधारा च। ब्राह्मणविचारधारा ब्रह्मणः निकटं भ्रमति एवमीश्वर एव सृष्टिकत्र्ता, संहारकत्र्ता, धरणकत्र्ता, व्यक्तेः भाग्यविधाता च वर्तते। प्राचीनधर्मिकविचारधारा संहारकर्ता, धारणकर्ता, व्यक्ते भाग्यविधता च वर्तते। श्रमणविचारधारा स्वकीयपुरुषद्वारा पुष्टा भवति तत्र ईश्वरः नास्ति सृष्टिकर्ता-धर्ता-हर्तारश्च।

श्वेताम्बरपरम्परानुसारं भगवतः महावीरस्य समये आगमग्रन्था लिपिबद्धा अभवन्। किन्तु दिगम्बरपरम्परानुसारागमाः मौखिकरूपेण प्रचलन्ति स्म। ई. पू. प्रथमशताब्द्यां सर्वप्रथमं धरसेनाचार्येण ' षटखण्डागम' नामकग्रन्थस्य रचना कृता। जैनधर्मदर्शनसाहित्यसंस्कृतीनां मूलाधरः आगमः वर्तते। आगमस्य सुदृढधरातले एव जैनदर्शनस्य जैनसंस्कृतेश्च भव्यप्रासादः निर्मिताऽस्ति। वैदिकपरम्परायां यादृशस्थानं वेदस्य वर्तते एवञ्च बौद्धपरम्परायां यद्स्थानं त्रिपिटकानां वर्तते इस्लामे कुरानस्य यद्स्थानं तदेव स्थानं जैनपरम्परायां आगमसाहित्यस्य वर्तते। आगमशब्द ' आ' उपसर्गपूर्वकात् गम् धतोः निष्पद्यते। तेनानुसारमागमशब्दस्य स्वरूपं वर्तते येन वस्तुत्तत्त्वस्य परिपूर्णं ज्ञानं भवति। येन पदार्थानां यथार्थज्ञानं भवेत् सः आगमः। येन पदार्थानां परिपूर्णमर्यादितज्ञानञ्च भवेत् स आगमः। एवञ्च यत् तत्त्वम् आचारपरम्परायाः वासितं भूत्वा आगच्छति स आगमेति। उपचारादाप्तवचनमपि आगमेति मन्यते। आप्तस्य कथनमेव आगमः। येन सच्छिक्षा प्राप्यते एवं विशेषज्ञानमुपलभ्यते तत् शास्त्रागमः अथवा श्रुतज्ञानमिति कथ्यते।

जैनदर्शनदृष्ट्या कोऽयमाप्तः? अस्य प्रश्नोत्तरे उच्यते यत् ये रागद्वेषातीताः ते जिनाः, तीर्थंकराः, सर्वज्ञा भगवान् एव आप्तपुरुषः। तेषामुपदेशवाण्याः एव जैनागमः वर्तते। जैनागमानां पा्रचीनतमं वर्गीकरणं समवामांगे मिलति। तत्रागमसाहित्यस्य पूर्णरूपेण विभाजनं कृतं वर्तते। ' पूर्व' संख्यादृष्ट्या चतुर्दशागस्य द्वादशः विद्येते। तानि द्वादशंगानि सन्ति - 1. आचारः, 2. सूत्रकृत्रम्, 3. स्थानम्, 4. समवायः, 5. भगवदाराधना, 6. ज्ञाताधर्मकथा, 7. उपासकदशा, 8. अन्तकृतदशा, 9. अनुत्तरोपपातिकः, 10. प्रश्नव्याकरणम्, 11. विपाकः, 12. दृष्टिवादश्चेति। अतः भारतीयदर्शनेषु जैनदर्शनस्य तथा जैननैतिकमूल्यानां महत्त्वपूर्णस्थानमस्ति।

**सन्दर्भग्रन्थाः**


1. जैनेन्द्रसिद्धान्तकोश, भाग-2, भारतीय ज्ञानपीठ, नई दिल्ली
2. तत्त्वार्थसूत्रम्, आचार्य उमास्वाति, पारस प्रकाशन, उल्धनपुर, नवीन शाहादरा, दिल्ली, षष्ठसंस्करण, 1963
3. राजवार्तिक, अकलंक, भाग-1,2, भारतीय ज्ञानपीठ, नई दिल्ली
4. षड्दर्शनसमुच्चय, हरिभद्रसूरि, भारतीय ज्ञानपीठ, नई दिल्ली, 1970
5. सर्वार्थसिद्धिः, आचार्य पूज्यपादविरचित, भारतीय ज्ञानपीठ, लोदी रोड, नई दिल्ली, 1935
6. स्याद्वाद मञजरी, मल्लिसेन, रामचन्द्र जैन शास्त्रमाला, बम्बई